पौषोऽर्धमासः । पौषः संवत्सरः । इह न भवति, पौषी पौर्णमासी अस्मिन् [1]दशरात्रे इति (म. भा. २.२७५)। भृतकमासे च न भवति (म.भा. २.२७५)। इतिकरणस्य सञ्ज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणं, तत्र किमर्थं द्वयमुपादीयते ? सञ्ज्ञाशब्देन तुल्यताम् इतिकरणस्य ज्ञापयितुं, न ह्ययं लोके तथा प्रसिद्धः। सञ्ज्ञार्थत्वे तु सम्प्रति ज्ञापिते यत् तत्र तत्रोच्यते इतिकरणस्ततश्चेद् [2]विवक्षा इति तदुपपन्नं भवति[3]। अथ पौर्णमासी इति कोऽयं शब्दः। 'पूर्णमासादण्' (वा. ४१०) पौर्णमासी। अथवा पूर्णो माः पूर्णमाः, पूर्णमास इयं पौर्णमासी। मा इति चन्द्र उच्यते ॥

## आग्रहायण्यश्वत्थाट् ठक्। (२२/१२२४)

सा अस्मिन् पौर्णमासी इति सर्वमनुवर्तते। आग्रहायणीशब्दाद् [4]अश्वत्थशब्दाच्च प्रथमासमर्थात् पौर्णमास्युपाधिकाद् अस्मिन्निति सप्तम्यर्थे ठक् प्रत्ययो भवति। अणोऽपवादः। [5]आग्रहायणिको मासः, अर्धमासः, [6]संवत्सरः। [7]एवम् आश्वत्थिकः ॥

## विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः। (२३/१२२५)

फाल्गुन्यादयः पौर्णमासीशब्दाः, तेभ्यो विभाषा ठक् प्रत्ययो भवति, 'साऽस्मिन् पौर्णमासीति सञ्ज्ञायाम्' (४.२.२१/१२२३) इत्येतस्मिन् विषये। नित्यमणि प्राप्ते [8]पक्षे ठग् विधीयते। [9]फाल्गुनो मासः, फाल्गुनिकः। श्रावणः, श्रावणिकः। कार्तिकः, कार्तिकिकः। चैत्रः, [10]चैत्रिकः ॥

## साऽस्य देवता। (२४/१२२६)

सा इति प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, [11]यत् प्रथमासमर्थं देवता चेत् सा भवति। यागसंप्रदानं देवता, देयस्य पुरोडाशादेः स्वामिनी, तस्मिन्नभिधेये [12]प्रत्ययः। इन्द्रो देवता अस्य ऐन्द्रं हविः। आदित्यम्। बार्हस्पत्यम्। [13]प्राजापत्यम्। देवता इति किम्? [14]कन्या देवता अस्य। कथमैन्द्रो मन्त्रः? मन्त्रस्तुत्यमपि देवता [15]इत्युपचरन्ति। कथमाग्नेयो वै ब्राह्मणो [16]देवता इति? उपमानाद् भविष्यति। 'महाराज[17]प्रोष्ठपदाट् ठञ्' (४.२.३५/१२३८) इति यावत् 'साऽस्य देवता' इत्यधिकारः। सा इति [18]प्रकृते पुनः समर्थविभक्ति[19]निर्देशः [20]सञ्ज्ञानिवृत्त्यर्थः ॥

## कस्येत्। (२५/१२२७)

कशब्दो [21]देवतायां प्रजापतेर्वाचकः, ततः पूर्वेणैव अण् प्रत्ययः सिद्धः, [22]इकारादेशार्थं वचनम्। कस्य इकारादेशो भवति प्रत्ययसन्नियोगेन। [23]कायं हविः। 'कायमेककपालं निर्वपेत्' (मै. सं. ३.१५.१०) ॥

## शुक्राद् घन्। (२६/१२२८)

शुक्रशब्दात् साऽस्य देवता इत्यस्मिन्नर्थे घन् प्रत्ययो भवति। अणोऽपवादः। [24]शुक्रियं हविः। शुक्रियोऽध्यायः ॥

---

1. पञ्चदशरात्रे क. 2. विवक्षिते क. 3. इति इत्यधिकम् फ. 4. अश्वत्थ नास्ति क. 5. आग्रहायणी पौर्णमासी अस्मिन् अस्ति इति आग्रहायणिको मासः। अश्विनीयुक्ता पौर्णमासी आश्वत्थी तद्वान् मासः आश्वत्थिकः फ. 6. संवत्सरः नास्ति फ. 7. एवमाश्वत्थिकः नास्ति फ. 8. पक्षे नास्ति क. 9. फाल्गुनी पौर्णमासी अस्मिन् स फाल्गुनः फाल्गुनिकः मासः ब. 10. चैत्रिकः नास्ति फ. 11. तत् ह. 12. अयम् इत्यधिकम् ब. 13. प्राजापत्यम् नास्ति ब. फ. 14. कन्या देवदत्तस्य क. 15. इत्युपाचरन्ति ब. 16. देवदत्तायाः ब. 17. प्रोष्ठपदाभ्याम् क. फ. 18. प्रकृतेः क. 19. ग्रहणम् ह. 20. संज्ञानिवृत्त्यर्थम् ह, संज्ञिनिवृत्त्यर्थः फ. 21. देवतायाः फ. 22. इकादेशार्थः फ. 23. कायः पुरोडाशः ह, को देवता यस्य इत्यधिकम् फ. 24. शुक्रीयं हविः, शुक्रीयोऽध्यायः ह.